# ॥ श्रीदत्तात्रेय स्तोत्रम् ॥

ॐ जटाधारं पांडुरंगं शूलहस्तं कृपानिधिम् ।
सर्वरोगहरं देवं दत्तात्रेयमहं भजे ॥
अस्य दत्तात्रेयस्तोत्रमंत्रस्य । भगवान् नारद ऋषिः ।
अनुष्टुप छंदः । श्रीदत्त परमात्मा देवता ।
श्री दत्तप्रीत्यर्थे जपे विनियोगः ॥
जगदुत्पत्ति कर्त्रे च स्थितिसंहार हेतवे ।
भवपाश विमुक्ताय दत्तात्रेय नमोऽस्तुते ॥१॥
जराजन्मविनाशाय देहशुद्धीकराय च ।
दिगंबर दयामूर्ते दत्तात्रेय नमोऽस्तुते ॥२॥
कर्पूरकांतिदेहाय ब्रह्ममूर्तिधराय च ।
वेदशास्त्रपरिज्ञाय दत्तात्रेय नमोऽस्तुते ॥३॥
ऱ्हस्वदीर्घकृशस्थूल नामगोत्र विवर्जित ।
पंचभूतैकदीप्ताय दत्तात्रेय नमोऽस्तुते ॥४॥
यज्ञभोक्त्रे च यज्ञाय यज्ञरूपधराय च ।
यज्ञप्रियाय सिद्धाय दत्तात्रेय नमोऽस्तुते ॥५॥
आदौब्रह्मा मधे विष्णुरंते देवः सदाशिवः ।
मूर्तित्रयस्वरूपाय दत्तात्रेय नमोऽस्तुते ॥६॥
भोगालयाय भोगाय योग्यायोग्याय धारिणे ।
जितेंद्रियजितज्ञाय दत्तात्रेय नमोऽस्तुते ॥७॥
दिगंबराय दिव्याय दिव्यरूप धराय च ।
सदोदितपरब्रह्म दत्तात्रेय नमोऽस्तुते ॥८॥
जंबुद्वीपे महाक्षेत्रे मातापुरनिवासिने ।
जयमानसतां देवं दत्तात्रेय नमोऽस्तुते ॥९॥
भिक्षाटनं गृहे ग्रामे पात्रं हेममयं करे ।
नाना स्वादमयी भिक्षा दत्तात्रेय नमोऽस्तुते ॥१०॥

ब्रह्मज्ञानमयी मुद्रा वस्त्रेचाकाशभूतले ।
प्रज्ञानघनबोधाय दत्तात्रेय नमोऽस्तुते ॥११॥
अवधूतसदानंद परब्रह्मस्वरूपिणे ।
विदेहदेहरूपाय दत्तात्रेय नमोऽस्तुते ॥१२॥
सत्यरूपसदाचार सत्यधर्मपरायण ।
सत्याश्रयपरोक्षाय दत्तात्रेय नमोऽस्तुते ॥१३॥
शूलहस्तेगदापाणि वनमाला सुकंदर ।
यज्ञसूत्रधरं ब्रह्म दत्तात्रेय नमोऽस्तुते ॥१४॥
क्षराक्षर स्वरूपाय परात्परतराय च ।
दत्तमुक्तिपरं स्तोत्रं दत्तात्रेय नमोऽस्तुते ॥१५॥
दत्त विद्याढ्यलक्ष्मीश दत्त स्वात्मस्वरूपिणे ।
गुणनिर्गुण रूपाय दत्तात्रेय नमोऽस्तुते ॥१६॥
शत्रूनाश करं स्तोत्रं ज्ञानविज्ञान-दायकम् ।
सर्व पापं शमं याति दत्तात्रेय नमोऽस्तुते ॥१७॥
इदं स्तोत्रं महद्दिव्यं दत्त प्रत्यक्षकारकम् ।
दत्तात्रेय प्रसादाश्च नारदेन प्रकीर्तितम् ॥१८॥

**॥ श्रीदत्तात्रेय स्तोत्रं संपूर्णम् ॥**

हे स्तोत्र दररोज १६ वेळा म्हणावे. या स्तोत्राच्या पठणाने जीवन संपूर्ण सुखी होते व श्रीदत्तात्रेयांची कृपा होते.